चारविभ्रंशाद् भ्रमः४ स परिकीर्त्तितः। आवर्त्त इव तोयस्य ज्ञानावर्त्तो यदाकुलः। नाशयेच्चित्तमावर्त्त५ उपसर्गः स उच्यते। एतैर्नाशितयोगास्तु सकला देवयोनयः। उपसर्गैर्महाघोरैरावर्त्तन्ते पुनःपुनः”।

**प्रातिभाव्य** न० प्रतिभुवो भावः ष्यञ् द्विपदवृद्धिः। (जामिनि) १प्रतिभूभावे प्रतिभूत्वेन देये २धने च मनुः ८।१५। ५८ दर्शनप्रतिभूशब्दे २४७५ पृ० दृश्यम्।

**प्रातिभासिक** त्रि० प्रतिभासादागतः ठक्। प्रतिभासाधीनसत्त्ववति मिथ्यारजतादौ वेदान्तमते हि सत्त्वं त्रिविधं पारमार्थिकं व्यवहारिकं प्रातिभासिकं च तत्र ब्रह्मणः सत्त्वं पारमार्थिकं त्रिकालाबाध्यत्वात्, घटादीनां सत्त्वं व्यवहारिकं व्यवहारकालेऽबाध्यत्वात्, शुक्तौ रजतादेः सत्त्वं प्रातिभासिकम् अधिष्ठानज्ञानबाध्यत्वात् प्रतिभासकालमात्रसत्त्वाच्चेति वेदान्तपरिभाषायां स्थितम्।

**प्रातिशाख्य** त्रि० प्रतिशाखं भवः परिमुखा० ञ्य। प्रतिशाखं भवे व्याकरणभेदे न०।

**प्रातिश्रुत्क** पु० प्रतिश्रुति तत्समये भवः ठञ्। प्रतिश्रवणवेलायां भवे पुरुषे “यत्र वाय श्रौत्रः प्रातिश्रुत्कः पुरुषः” छ० उ०। [२प्रतिव्यक्तिभवे च।

**प्रातिस्विक** त्रि०प्रतिस्वं भवः ठक्। १असाधारणधर्मे त्रिका०।

**प्रातिहर्त्त** न० प्रतिहर्तुर्भावः कर्म वा उद्गात्रा० अञ्। प्रतिहर्त्तृरूपस्य ऋत्विग्भेदस्य कर्मणि १प्रतिहरणे २तद्भावे च।

**प्रातिहारक** पु० प्रतिहारक एव स्वार्थे अण्। प्रतिहारकशब्दार्थे अमरः। [कारके अमरः।

**प्रातिहारिक** त्रि० प्रतिहारः प्रयोजनमस्य ठक्। माया-

**प्रातीतिक** त्रि०प्रतीत्या निर्वृत्तः ठञ्। प्रातिभासिके पदार्थे

**प्रातीप** प्रतीपस्यापत्यम् अण्। प्रतीपन्टपस्यापत्ये शान्तनौ न्टपे त्रिका०। [कूलाचारिणि।

**प्रातीपिक** त्रि० प्रतीपं वर्त्तते ठञ्। प्रतीपं वर्त्तमाने प्रति-

**प्रातृद** पु० ऋषिभेदे शत०ब्रा० १४।८।१२।२

**प्रात्ययिक** त्रि० प्रत्ययाय स्थितः ठक्। प्रतिभूभेदे “दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा” याज्ञ०। दर्शनप्रतिभूशब्दे २४७८ पृ०दृश्यम्।

**प्राथमकल्पिक** त्रि० प्रथमकल्पे भवः ठक्। १प्रथमारम्भोचिते वेदाध्ययनादौ। प्रथमं कल्पमधीते कल्पान्तत्वात् ठक्। २प्रथमकल्परूपशिक्षाग्रन्थाध्यायिनि अमरः।

**प्राथमिक** त्रि० प्रथमे भवः ठञ्। १प्रथमभवे स्त्रियां ङीप्। प्रथममधीते प्रथम+ठक्। वेदादेः २प्रथमाध्येतरि च।

**प्रादि** पु० उपसर्गसंज्ञार्थं पा०उक्ते शब्दभेदे स च गणः पा० ग०उक्तो यथा “प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत्(द्) अभि प्रति परि उप” एते प्रादयः। निस् दुस् सान्तौ “निसस्तपतावनासेवने इति (८।३।१२०) सूत्रे निस इति निर्देशात् निष्कृतं दुष्कृतमित्युदाहृत्य “इदुदुपधस्य चा विसर्जनीयः” इति भाष्योक्तेश्च। निरः कुषः इति (७।२।४६) “दुरोरधिकरणे” इति च निर्देशात् रान्तावपि मतौ०। उदिति दान्तोऽपि “उदोऽनूर्ध्वचेष्टायामिति”। “उपसर्गाः क्रियायोगे”पा० “गतिश्च” पा० प्रादयः क्रियायोगे उपसर्गसंज्ञा गतिसंज्ञाश्च स्युः” सि०कौ०।

**प्रादुराक्षि** पु० गोत्रप्रवरर्षिभेदे प्रवराध्यायः।

**प्रादुर्भाव** पु० प्रादुस्+भू—भावे घञ्। आविर्भावे प्रथमप्रकाशे

**प्रादुस्** अव्य० प्र+अद—उसि। प्राकाश्ये अर्थो० अस्य क्रियायोगे गतिसंज्ञा प्रादुष्कृत्य प्रादुर्भूय। स्वार्थे अत् न टिलोपः प्रादुष प्रादुर्भावे न० उज्ज्वलदत्तः।

**प्रादेश** पु० प्र+दिश-घञ् दीर्घः। १तर्जनीसहितविस्तृताङ्गुष्ठे अमरः २देशमात्रे मेदि० “अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते” इत्युक्ते ३परिमाणभेदे च देवीपु०।

**प्रादेशन** न० प्र+आ+दिश—ल्युट्। दाने अमरः।

**प्रादेशिक** त्रि० प्रदेशे भवः ठक्। प्रदेशभवे [स्त्रियां ङीप्।

**प्रादोष(षि)क** त्रि० प्रदोषे भवः वा अणठञौ। प्रदोषभवे

**प्रादोहनि** पु०स्त्री प्रदोहनस्यापत्यम् इञ्। तदपत्ये। ततः यूनि फञ् तौल्व० तस्य न लुक्। प्रादोहनायनि तदीये यून्यपत्ये पुंस्त्री०। [करणे भाग०३,८।३१।

**प्राधनिक** त्रि० प्रधनं संग्रामः प्रयोजनमस्य ठक्। युद्धोप-

**प्राधा** स्त्री प्रधैव स्वार्थे ण। दक्षकन्याभेदे काश्यपकलत्रभेदे हरिवं०२२६अ०। तस्याः अपत्यं ढक्। प्राधेय तदपत्ये पुंस्त्री० तदपत्यानि च देवगन्धर्वादयः भा०आ०६५ अ०। अग्निपुराणे प्राधेया इत्येव पाठः शब्दकल्पद्रुमे प्राधेय शब्दकल्पनं लिपिकरप्रमादकृतपाठदर्शनात् इति बोध्यम्।

**प्राधानिक** त्रि० प्रधान+स्वार्थे ढक् तस्येदं ठक् वा। १प्रधानशब्दार्थे २प्रधानसम्बन्धिनि च “प्राधानिकरहस्यञ्च” इत्यादि देवीमाहात्म्यव्याख्यायां गुप्तवत्यां स्थितम्।

**प्राधान्य** न० प्रधानस्य भावः ष्यञ्। श्रेष्ठत्वे। भावे त्वप्रधानत्व न० तल् प्रधानता स्त्री तत्रार्थे। “अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता” शाब्दिककारिका।